vyóma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

कृदन्ताः

पाठः २८ – १८.११.२०१७

क्त-प्रत्ययः – हलन्तधातूनां रूपाणि, कर्तरि क्तः

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

मङ्गलम्

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिल-शक्ति-धरः स्वधाम्ना ।
अन्यांश्च हस्त-चरण-श्रवण-त्वगादीन्
प्राणान् नमो भगवते पुरुषाय तुभ्यम् ॥
गुरुरेव गतिः गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

पुनरावर्तनम्

- क्त-प्रत्ययः – त
- भूतकालार्थकः कर्मार्थकः प्रत्ययः
- सर्वेभ्यः धातुभ्यः भवति
- त्रिषु लिङ्गेषु रूपाणि – अकारान्तः पुंलिङ्गः, आकारान्तः स्त्रीलिङ्गः, अकारान्तः नपुंसकलिङ्गः
- सर्व-विभक्ति-वचनेषु प्रयोगाः
- प्रयोगपरिवर्तनम् (क्तवतु – क्त)
- अजन्तधातूनां रूपाणि

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

हलन्तधातूनां क्तप्रत्ययान्त-रूपाणि

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सेट्-धातूनां सामान्यरूपाणि

- अर्च् – अर्चितम्
- ईक्ष् – ईक्षितम्
- खाद् – खादितम्
- क्रीड् - क्रीडितम्
- लिख् – लिखितम्
- मिल् – मिलितम्
- कुप् – कुपितम्
- रुद् – रुदितम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – १
प्रयोगं परिवर्तयत

- बालाः पाठं पठितवन्तः
- हनूमान् समुद्रं लङ्घितवान्
- बालिकाः क्रीडितवत्यः
- वयं रामायणं नटितवन्तः
- सा उच्चैः हसितवती
- लवकुशौ वाल्मीकिं वन्दितवन्तौ

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – १ – उत्तराणि
प्रयोगं परिवर्तयत

- बालाः पाठं पठितवन्तः
- हनूमान् समुद्रं लङ्घितवान्
- बालिकाः क्रीडितवत्यः
- वयं रामायणं नटितवन्तः
- सा उच्चैः हसितवती
- लवकुशौ वाल्मीकिं वन्दितवन्तौ

- बालैः पाठः पठितः
- हनूमता समुद्रः लङ्घितः
- बालिकाभिः क्रीडितम्
- अस्माभिः रामायणं नटितम्
- तया उच्चैः हसितम्
- लवकुशाभ्यां वाल्मीकिः वन्दितः

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सुभाषितम्

पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु ।

लुब्धेन सञ्चितं द्रव्यं समूलं हि विनश्यति ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

णिजन्ताः धातवः - सेटः

- चोरयति – चोरितम्
- क्षालयति – क्षालितम्
- कथयति – कथितम्
- गणयति – गणितम्
- तोलयति - तोलितम्
- पाठयति – पाठितम्
- दापयति – दापितम्
- रोदयति – रोदितम्
- भोजयति – भोजितम्
- गमयति - गमितम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – २
संस्कृतेन अनुवदत (कर्तरि / कर्मणि)

- The women washed vessels in the river.
- The two thieves stole gold from the rich man's house.
- The teacher taught the students well.

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – २ – उत्तराणि
संस्कृतेन अनुवदत (कर्तरि / कर्मणि)

- The women washed vessels in the river.
- The two thieves stole gold from the rich man's house.
- The teacher taught the students well.

- महिलाः नद्यां पात्राणि क्षालितवत्यः।
- महिलाभिः नद्यां पात्राणि क्षालितानि ।
- चोरौ धनिकस्य गृहात् सुवर्णं चोरितवन्तौ ।
- चोराभ्यां धनिकस्य गृहात् सुवर्णं चोरितम् ।
- अध्यापकः छात्रान् सम्यक् बोधितवान् ।
- अध्यापकेन छात्राः सम्यक् बोधिताः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – २
संस्कृतेन अनुवदत

- The boy made his sister cry.
- I counted the stars in the sky.
- Yashoda fed Krishna.

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – २ – उत्तराणि संस्कृतेन अनुवदत

- The boy made his sister cry.
- I counted the stars in the sky.
- Yashoda fed Krishna.

- बालः अनुजां रोदितवान् ।
- बालेन अनुजा रोदिता ।
- अहम् आकाशे नक्षत्राणि गणितवान् / गणितवती ।
- मया आकाशे नक्षत्राणि गणितानि ।
- यशोदा कृष्णं भोजितवती ।
- यशोदया कृष्णः भोजितः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सुभाषितम्

कल्पद्रुमः कल्पितमेव सूते
सा कामधुक् कामितमेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते
सतां तु सङ्गः सकलं प्रसूते ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अनिट्-धातवः - हल्सन्धिः

- कृष् – कृष्टम्
- दृश् – दृष्टम्
- लभ् – लब्धम्
- क्रुध् – क्रुद्धम्
- त्यज् – त्यक्तम्
- भुज् - भुक्तम्
- दह् – दग्धम्
- दुह् – दुग्धम्
- लिह् – लीढम्
- गाह् – गाढम्
- छिद् – छिन्नम्
- नुद् – नुन्नम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ३
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- कृषिकः भूमिं कर्षति ।
- अहं काश्यां विश्वनाथं पश्यामि ।
- ते प्रभूतं धनं लभन्ते ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ३ – उत्तराणि
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- कृषिकः भूमिं कर्षति ।
- अहं काश्यां विश्वनाथं पश्यामि ।
- ते प्रभूतं धनं लभन्ते ।

- कृषिकः भूमिं कृष्टवान् ।
- कृषिकेण भूमिः कृष्टा ।
- अहं काश्यां विश्वनाथं दृष्टवान्/वती
- मया काश्यां विश्वनाथः दृष्टः ।
- ते प्रभूतं धनं लब्धवन्तः ।
- तैः प्रभूतं धनं लब्धम् ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ३
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- कुन्ती कर्णं गङ्गायां त्यजति ।
- गोपालाः सायं क्षीरं दुहन्ति ।
- भीमः गदया स्तम्भं भिनत्ति ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ३ – उत्तराणि
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- कुन्ती कर्णं गङ्गायां त्यजति ।
- गोपालाः सायं क्षीरं दुहन्ति ।
- भीमः गदया स्तम्भं भिनत्ति ।

- कुन्ती कर्णं गङ्गायां त्यक्तवती ।
- कुन्त्या कर्णः गङ्गायां त्यक्तः ।
- गोपालाः सायं क्षीरं दुग्धवन्तः ।
- गोपालैः सायं क्षीरं दुग्धम् ।
- भीमः गदया स्तम्भं भिन्नवान् ।
- भीमेन गदया स्तम्भः भिन्नः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सुभाषितम्

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णम्
प्राणान्तेऽपि हि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अनुनासिकलोपः

- गम् – गतम्
- नम् – नतम्
- यम् – यतम्
- हन् – हतम्
- मन् - मतम्
- बन्ध् – बद्धम्
- दंश् – दष्टम्
- भ्रंश् - भ्रष्टम्
- ग्रन्थ् – ग्रथितम्
- मन्थ् - मथितम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ४
प्रयोगं परिवर्तयत

- रामः लङ्कां गतवान्, रावणं हतवान्
- देवासुराः मन्दरपर्वतं वासुकिना बद्धवन्तः, क्षीरसागरं मथितवन्तः
- कालिदासः पार्वतीपरमेश्वरौ प्रणतवान्, रघुवंशं ग्रथितवान्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ४ – उत्तराणि प्रयोगं परिवर्तयत

- रामः लङ्कां गतवान्, रावणं हतवान्
- देवासुराः मन्दरपर्वतं वासुकिना बद्धवन्तः, क्षीरसागरं मथितवन्तः
- कालिदासः पार्वतीपरमेश्वरौ प्रणतवान्, रघुवंशं ग्रथितवान्

- रामेण लङ्का गता, रावणः हतः
- देवासुरैः मन्दरपर्वतः वासुकिना बद्धः, क्षीरसागरः मथितः
- कालिदासेन पार्वतीपरमेश्वरौ प्रणतौ, रघुवंशं ग्रथितम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

गीतास्तुतिः

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयम्
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सम्प्रसारणम्

- यज् – इष्टम्
- स्वप् – सुप्तम्
- वच् – उक्तम्
- वद् – उदितम्
- वप् - उप्तम्
- वस् – उषितम्
- वह् – ऊढम्
- ह्वे - हूतम्
- ग्रह् – गृहीतम्
- प्रच्छ् - पृष्टम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- भृत्यः भारं वहति ।
- बालिका सुखेन स्वपिति ।
- हरिश्चन्द्रः सत्यमेव वक्ति ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५ – उत्तराणि
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- भृत्यः भारं वहति ।
- बालिका सुखेन स्वपिति ।
- हरिश्चन्द्रः सत्यमेव वक्ति ।

- भृत्यः भारम् ऊढवान् ।
- भृत्येन भारः ऊढः ।
- बालिका सुखेन सुप्तवती ।
- बालिकया सुखेन सुप्तम् ।
- हरिश्चन्द्रः सत्यमेव उक्तवान् ।
- हरिश्चन्द्रेण सत्यमेव उक्तम् ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५
भूतकाले परिवर्तयत

- सा सखीम् आह्वयति ।
- देवी भक्तान् अनुगृह्णाति ।
- तौ कथां संस्कृतेन अनुवदतः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५ – उत्तराणि भूतकाले परिवर्तयत

- सा सखीम् आह्वयति ।
- देवी भक्तान् अनुगृह्णाति ।
- तौ कथां संस्कृतेन अनुवदतः ।

- सा सखीम् आहूतवती ।
- तया सखी आहूता
- देवी भक्तान् अनुगृहीतवती ।
- देव्या भक्ताः अनुगृहीताः ।
- तौ कथां संस्कृतेन अनूदितवन्तौ ।
- ताभ्यां कथा संस्कृतेन अनूदिता ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

रामायणम्

गृहीतश्चैव पृष्टश्च काले दृष्टस्सकारणः।

कच्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ॥

अयोध्याकाण्डम् – कच्चित्सर्गः (सर्गः १००)

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

विशिष्टरूपाणि

- पच् – पक्कम्
- जन् – जातम्
- खन् – खातम्
- सह् - सोढम्
- अद् – जग्धम्
- शास् – शिष्टम्
- तक्ष् – तष्टम्
- दिव् – द्यूतम्
- सिव् – स्यूतम्
- मूर्च्छ् - मूर्तम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ६
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- माता भोजनं पक्ष्यति ।
- कर्मकरः कूपं खनिष्यति ।
- सा वस्त्राणि सीव्यति ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ६ – उत्तराणि
भूतकाले परिवर्तयत (कर्तरि/कर्मणि)

- माता भोजनं पक्ष्यति ।
- कर्मकरः कूपं खनिष्यति ।
- सा वस्त्राणि सीव्यति ।

- माता भोजनं पक्वती ।
- मात्रा भोजनं पक्वम् ।
- कर्मकरः कूपः खातवान् ।
- कर्मकरेण कूपः खातः ।
- सा वस्त्राणि स्यूतवती ।
- तया वस्त्राणि स्यूतानि ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

कर्त्रर्थे क्त-प्रत्ययस्य प्रयोगः

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सुभाषितम्

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

गत्यर्थकधातूनाम्, अकर्मकाणां च

- गच्छति । गतवान् = गतः ।
- आगच्छति । आगतवान् = आगतः
- प्राप्नोति । प्राप्तवान् = प्राप्तः ।
- याति । यातवान् = यातः ।
- जायते । जातवान् = जातः ।
- स्वपिति । सुप्तवान् = सुप्तः ।
- तिष्ठति । स्थितवान् = स्थितः ।
- उपविशति । उपविष्टवान् = उपविष्टः
- स्नाति । स्नातवान् = स्नातः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ७
भूतकाले परिवर्तयत (कर्तरि क्तवतु/क्त)

- मम बान्धवाः गृहम् आगच्छन्ति ।
- भवतः पुत्रः कदा जायते?
- सर्वे कटे उपविशन्ति ।
- महाराजः आस्थानं प्रविशति ।
- छात्राः पङ्क्तौ तिष्ठन्ति ।
- नाटकस्य अन्ते नटाः निर्गच्छन्ति ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ७ – उत्तराणि
भूतकाले परिवर्तयत (कर्तरि क्तवतु/क्त)

- मम बान्धवाः गृहम् आगच्छन्ति ।
- भवतः पुत्रः कदा जायते?
- सर्वे कटे उपविशन्ति ।
- महाराजः आस्थानं प्रविशति ।
- छात्राः पङ्क्तौ तिष्ठन्ति ।
- नाटकस्य अन्ते नटाः निर्गच्छन्ति ।

- मम बान्धवाः गृहम् आगतवन्तः/आगताः ।
- भवतः पुत्रः कदा जातवान्/जातः?
- सर्वे कटे उपविष्टवन्तः/उपविष्टाः ।
- महाराजः आस्थानं प्रविष्टवान् / प्रविष्टः ।
- छात्राः पङ्क्तौ स्थितवन्तः / स्थिताः ।
- नाटकस्य अन्ते नटाः निर्गतवन्तः/निर्गताः ।

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

सुभाषितम्

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुरा कृतानि ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

vyóma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

©All rights reserved.

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.